**वागुल्लासः** (तृतीयो भागः)

प्रकाशक: वितरकश्च **मान्यताप्रकाशनम्**
60-सी, मायाकुञ्जम्, मायापुरी
नवदेहली -1100 64 (भारतम्)
Tel 011 - 2540 7546, 2513 7546
9999 88 9290, 98110 14522
mail at manyataprakashan@gmail.com
manyata_prakashan@yahoo.com

© विशिष्टसंस्कृताध्ययनकेन्द्रम् (ज.ने.वि.)

ISBN 13 978-93-83559-67-1

Barcode

प्रथमसंस्करणम् 2017

मूल्यम् ₹ 985/-

मुद्रक: **नेशनल मार्किटिंगस्**
998, कटरा मंगलसेन,
चावड़ी बाजार, दिल्ली-6
mail at rakeshnational@gmail.com

कम्प्यूटरीकृतटङ्कणम् प्रिण्ट्रेड्स (Printrads) नवदेहली-110064

स्वयं सत्यापित

# ३१

# भारतीयनाट्यपरम्परायां विदूषकः – यवबालीद्वीपयोः पनकवन् –परेकान् पात्रयोश्च तुलनात्मकमध्ययनम्

ललितपाण्डेयः

**भारतीयनाट्यपरम्परा –**

प्रभूतसमृद्धिशालि गुणगौरवगरिमायुता चास्ति संस्कृतनाट्यपरम्परा। संस्कृत-नाटकानां रूपकाणां वा कीर्तिकौमुदी विश्वेऽस्मिन् सर्वत्र सुविख्याताऽस्ति। वैदेशिका अपि संस्कृतनाटकानां प्रशंसां सर्वदैव कुर्वन्ति॥ को न जानाति कालिदासस्य शाकुन्तलम् तद्वैशिष्ट्यञ्च। भासस्य नाट्यकलाकौशलं भवभूतेश्च प्रस्तररुदनहृदय-मर्मस्पृंशिवर्णनानि नितान्तहृद्यानि सन्ति। उत्तररामचरित-मुद्राराक्षस-वेणीसंहारादीनां रूपकाणां न केवलं भारते अपितु विदेशेष्वपि ख्याति: वर्तते। लोके यानि वृत्तानि घटन्ते तेषां सरसं सौन्दर्यचित्रणमेव नाटकमिति कथ्यते। धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तप्रकृतिका: नायका: तत्तत्प्रकृतिगत नायिकाविदूषकविटचे-टनटनटीपात्राणि आङ्गिकवाचिकाहार्यसात्त्विकाभिनयै: रामाद्यावस्थानुकरणं तादात्म्यप्रतीति वा नाट्यं कथ्यते। तदेव नाट्यं श्यमानतया रूपमित्युच्यते। नाट्ये नट: रामादि पात्राणामवस्थारोपणमेव रूपकं कथ्यते। रसानाश्रित्य एते रूपका: दशधा विभज्यन्ते। तानेव दशभेदानुद्दिशति आचार्यधनयिं: स्वकीये दशरूपके – नाटकं सप्रकरणं भाण: प्रहसनं डिम:।

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥**

श्रव्यकाव्यापेक्षया दृश्यकाव्यमधिकं मनोहरमानन्ददायकञ्च भवति। साधारणजन: गद्यपद्यकाव्यापेक्षया दृश्यभागाभिनयेन आत्मानमधिकं विनोदयितुं प्रभवति। एवञ्चोक्तं हि –